# माध्यमिकशिक्षापाठ्यक्रमः

## संस्कृतव्याकरणम्

**कक्षा : ९ र १०** **विषयसङ्केतः : (कक्षा ९** Byk. 309 **कक्षा १०** Byk. 310)

**पाठ्यघण्टा ४** **वार्षिककार्यघण्टा १२८**

### १. परिचयः

संस्कृतव्याकरणविषयस्य पाठ्यक्रमः पाणिनीयव्याकरणस्य सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणां पठनपाठनयोरुद्देश्येन विकसितो वर्तते । एतदर्थं २०७६ विक्रमवर्षीयस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनानुसारेण विद्यालयशिक्षाया माध्यमिकस्तरस्य (नवम्यां दशम्याञ्च कक्षयोः) पाठ्यक्रमेऽस्मिन् पाणिनीयव्याकरणस्य प्रतिप्रकरणमधीतविषयाणां बोधो बुद्धविषयाणामभिव्यक्तिसामर्थ्यञ्च छात्रेषु स्यादिति हेतोर्बोधाभिव्यक्त्योरुल्लेखोऽपि विहितो विद्यते । एतस्माद् वर्तमानसन्दर्भे संस्कृतमितोऽपि व्यावहारिकं निर्माय विद्यार्थिनां रुच्यकाङ्क्षे प्रपूर्य शिक्षाया राष्ट्रियोद्देश्यं प्राप्स्यते, एतस्य सान्दर्भिकतां विचार्य उपयुक्तता सुनिश्चिता च विधास्यत इत्यपेक्षितमस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चशिक्षाया आधारोऽपि निर्मात्स्यते इति चापेक्षितं वर्तते । माध्यमिकस्तरस्योपरितनकक्षयोरुच्चशिक्षायाः पाठ्यक्रमेष्वपि अत्र निर्धारितपाठ्यविषयाणामेव विस्तारो भवतीति पाठ्यक्रमोऽसौ न केवलं माध्यमिकस्तरस्य ११-१२ कक्षयोरपितूच्चशिक्षायाः संस्कृतव्याकरणविषयस्याधारभूमिरूपेण विकसितो वर्तते ।

पाणिनीयव्याकरणे वर्णभेदानाम्, वर्णोच्चारणस्थानप्रयत्नानाम्, पारिभाषिकसंज्ञानाम्, सन्धीनाम्, सुबन्तशब्दानाञ्च व्युत्पादनं व्यवस्थितसूत्रात्मकशैल्या कृतमभ्युपेयते । पाठ्यक्रमेऽस्मिन् निर्दिष्टेन विषयवस्तुना वर्ण-पद-वाक्यानां बोधे शब्दनिर्माणप्रकारज्ञाने तत्प्रयोगे च प्रयासो विहितोऽस्ति । अत्र सूत्र-वार्तिक-परिभाषाणामुदाहरणमुखेनार्थापने विशेषयत्नः कृतो वर्तते । अत्र नवमकक्षायां सिद्धान्तकौमुद्या मङ्गलाचरणादारभ्य अजन्तनपुंसकलिङ्गप्रकरणान्तो भागः समाविष्टो वर्तते, अत्रान्तरे व्याकरणस्य सन्धिप्रक्रिया, अजन्तशब्दानां रूपावल्याः सिद्धिप्रक्रिया च प्रमुखे वर्तेते । सहैव अष्टाध्याय्याः संरचनाज्ञानस्य, वर्णोत्पत्तेः क्रमज्ञानस्य स्थानप्रयत्नानां विशेषेण बोधस्य चावश्यकतां विचार्य तत्सम्बद्धविषयाः संज्ञाप्रकरणेऽन्तर्भाविताः सन्ति । दशम्यां कक्षायाञ्च हलन्तपुंल्लिङ्गप्रकरणात् स्त्रीप्रत्ययप्रकरणान्तो भागः पाठ्यांशेन निर्धारितोऽस्ति । अत्र निर्धारितानि विषयवस्तूनि विद्यार्थिनां प्रयोगात्मकाय शोधमूलकाय च निरन्तरशिक्षणाय, प्रयोगात्मिकायाः शोधाश्रितायाश्च मूल्याङ्कनपद्धत्या विकासाय च सहयोगीनि सेत्स्यन्तीति अपेक्ष्यते । छात्राणां ज्ञानपक्षेण साकं शिल्पाभिवृत्तिपक्षयोर्विकासाय प्रवृत्तेऽस्मिन् पाठ्यक्रमेऽध्ययनस्य व्यावहारिकाणां प्रयोगात्मकानाञ्च पक्षाणां प्राप्तये प्रयासो विहितोऽस्ति । संस्कृतव्याकरणस्य प्रकरणगतविषयशिक्षणे विकसिता नवीनविधि-पद्धत्यवधारणा अप्यस्य पाठ्यक्रमस्य विकासक्रमे मार्गदर्शकत्वेन स्वीकृताः सन्ति । प्रस्तुतपाठ्यक्रमस्य विकासक्रमे निर्दिष्टविषयाणामवधारणाविकासस्य, अभ्यासस्य, निरन्तरशिक्षणस्य सातत्यमूल्याङ्कनादीनाञ्च सन्तोलने प्रयत्नो विहितोऽस्ति ।

पाठ्यक्रमविकासस्य विषयगतमौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयम्, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यम्, कार्यतत्परताञ्च समाविश्यैतस्याः क्रियात्मकस्वरूपेण स्तरगतयोग्यतां शिक्षणस्य स्तरं स्तरगतयोग्यताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिं स्तरगतयोग्यतां पूर्वकक्षाभिस्सह लम्बीयसन्तोलनमाधृत्य विषयवस्तुनः क्षेत्रक्रमौ विषयगतविशिष्टतां मौलिकतां च संयोज्य शिक्षणसहजीकरणस्य विधिं प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं कृतमस्ति ।

### २. विषयानुगताः क्षमताः

**माध्यमिकस्तरे नवमीदशमीकक्षयोः संस्कृतव्याकरणविषयमधीत्य विद्यार्थिनो निर्दिष्टक्षेत्रे क्षमा भविष्यन्ति -**

१. वर्णानां स्थान-प्रयत्न-संज्ञानां प्रत्याहारगतवर्णानाञ्च बोधे प्रयोगे च

२. पाणिनीयव्याकरणशास्त्रीयपारिभाषिकसंज्ञानामवबोधनेन प्रयोगे

३. ससूत्रं पञ्चसन्धिप्रक्रियाज्ञाने प्रयोगे च

४. सुबन्तपदानां ससूत्रं रूपसिद्धिप्रक्रियावबोधपूर्वकं प्रयोगकौशलप्रदर्शने

५. अव्ययशब्दानामर्थज्ञानपुरःसरं पदत्वसाधने प्रयोगे च

६. निर्दिष्टसूत्र-वार्तिक-परिभाषा-कारिकाणामर्थनिर्वचनेन प्रयोगव्यापारे,

७. पठितपदानामर्थानुरूपप्रयोगेण वाक्यानुच्छेदनिबन्धरचनायाम्

८. पाणिनीयव्याकरणस्याधारभूतनियमानाश्रित्य संस्कृतभाषायाः प्रयोगे

## ३. कक्षागतशिक्षणोपलब्धयः

**नवमकक्षायाः**

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धिविस्तारः** |
|---|---|
| १. वर्णानां स्थान-प्रयत्न-भेदनिर्धारणपुरःसरं व्याकरणस्य पारिभाषिकसंज्ञानां परिभाषासूत्राणाञ्चार्थापनम्, सपरिचयमष्टाध्याय्या संरचनावबोधश्च | १.१ देवनागरीलिप्यन्तर्गतवर्णानां परिचायनम्<br>१.२ पाणिनीयशिक्षानुसारेण वर्णानामुच्चारणं लेखनञ्च<br>१.३ चतुर्दशमाहेश्वरसूत्राणां तत्प्रयोजनस्य च निर्वचनम्<br>१.४ प्रत्याहारसिद्धिप्रक्रियावबोधस्तत्प्रयोगश्च<br>१.५ वर्णानां भेदनिरूपणम्<br>१.६ वर्णोत्पत्तिप्रक्रियां शरीरावयवानां भूमिकां निरूप्य वर्णानां स्थाननिर्धारणम्<br>१.७ स्पृष्टादिसंज्ञानुशीलनेन वर्णानां प्रयत्ननिर्धारणम्<br>१.८ वर्णानां पारिभाषिकसंज्ञावबोधः<br>१.९ अष्टाध्यायीग्रन्थस्य संरचनाज्ञानेन सूत्राणां वैविध्यदर्शनम्<br>१.१० सूत्र-वार्तिक-परिभाषाणां लक्षणावबोधेन सूत्राणां षड्विधत्वसाधनम्<br>१.११ सपादीत्रिपादीसूत्राणां सोदाहरणं सिद्धत्वासिद्धत्वव्यवस्थानुशीलनम्<br>१.१२ ससूत्रं वृद्धि-गुण-धातु-निपात-उपसर्ग-गति-विभाषा-शब्द-विशेषण-अवसान-संहिता-पद-संयोग-लघु-गुरुसंज्ञानां परिज्ञानं प्रयोजनप्रदर्शनञ्च<br>१.१३ परिभाषासूत्राणां विधिसूत्रोपकारकत्वसाधनम्<br>१.१४ निर्दिष्टसूत्र-वार्तिक-परिभाषाणामर्थापनेन लक्ष्ये समन्वयप्रकारप्रदर्शनम् |
| २. अव्यवहितत्वेन पदान्तत्वेन वोच्चरितत्वेन जायमानं वर्णध्वनिपरिवर्तनं परिचित्य | २.१ सपरिचयं सन्धेः पञ्चविधत्वनिर्वचनम्<br>२.२ सन्धिविधानाय संहिताया आवश्यकत्वं प्रतिपाद्य तस्या नित्यताया विवक्षाधीनतायाश्चावस्थानिश्चयनम् |

| | |
|---|---|
| सन्धेर्विधानविच्छेदने, प्रकृतिभावनियमानुशीलनञ्च | २.३ स्थान्यादेशौ परिचाय्य स्थानिवद्भावनियमनिरूपणम्<br>२.४ स्थानिनः स्थानार्थगुणप्रमाणैरादेशस्य सादृश्यपरीक्षणेन सदृशतमस्य चयनम्<br>२.५ आदेशागमयोरनुबन्धव्यवस्थायास्तत्फलस्य स्थानिना सह शत्रुमित्रसम्बन्धस्य चावबोधेन स्थापनविधेरनुशीलनम्<br>२.६ ससूत्रं यण्-अयादि-यकारवकारलोप-गुण-वृद्धि-दीर्घ-पररूप-पूर्वरूपसन्धिनियमानां बोधः प्रयोगश्च<br>२.७ ससूत्रं द्वित्व-जश्व-लोप-संयोगान्तलोप-रपरत्वविधीनामनुशीलनम्<br>२.८ सोदाहरणं प्रकृतिभावस्य पारिभाषिकार्थप्रकाशनम्<br>२.९ प्लुत-प्रगृह्यसंज्ञाज्ञानेन तयोः प्रकृतिभावकारकत्वसाधनम्<br>२.१० प्लुत-प्रगृह्यसंज्ञयोः प्रकृतिभावस्य च विधायकानां सूत्रवार्तिकानामर्थानुशीलनं प्रयोगश्च<br>२.११ सत्यामपि संहितायां प्राप्ते च सन्धावपि स्वभावेनावतिष्ठतां प्रयोगाणां साधुत्वस्य प्रयोगकौशलस्य च प्रदर्शनम्<br>२.१२ श्चुत्व-ष्टुत्व-जश्त्व-चर्त्वानुनासिकानुस्वार-पूर्वसवर्ण-छत्व-परसवर्णसन्धिनियमाननुशील्य सन्धिविधानं सन्धिच्छेदनञ्च<br>२.१३ ङमुट्-धुट्-तुक्-अनुनासिकानुस्वारागमैः सन्धिप्रक्रियानुशीलनम्<br>२.१४ ससूत्रं विसर्गस्य सत्व-षत्व-विसर्गादेशसन्धिनियमनिर्वचनम्<br>२.१५ रुत्व-उत्व-सत्व-यत्व-यलोप-रेफादेश-रेफलोपनिमित्तकदीर्घ-सुलोपप्रभृतिस्वादिसन्धिनियमनिदर्शनम्<br>२.१६ निर्दिष्टसूत्र-वार्तिक-परिभाषाणामर्थापनेन प्रयोगसिद्धिप्रक्रियाप्रदर्शनं प्रयोगश्च |
| ३. अजन्तपुंलिङ्गशब्दानां ससूत्रं रूपसिद्धिप्रक्रियान्वाख्यानं रूपावल्याः प्रयोगश्च | ३.१ लिङ्गानां त्रिविधत्वप्रतिपादनपूर्वकं निर्धारितानां तत्सदृशानाञ्चाजन्तपुंलिङ्गशब्दानां निदर्शनम्<br>३.२ प्रातिपदिकसंज्ञासूत्रयोरर्थापनेन द्वितीये समासग्रहणकृतनियमप्रतिपादनपुरःसरं व्युत्पन्नाव्युत्पन्नशब्दानां प्रातिपदिकत्वसाधनम्<br>३.३ लिङ्गविशिष्टपरिभाषया सिद्धे ङ्याप्प्रातिपदिकादित्यत्र ङ्याब्ग्रहणस्य प्रयोजनदर्शनम्<br>३.४ सुप्प्रत्ययानां विभक्तित्वस्यानुबन्धविनिमुक्तस्वरूपाणाम् अजादि-हलादि-भादि-ङित्वादिविशेषतानां सर्वनामस्थान-सुट्-औङ्-आप्संज्ञानाञ्चावबोधेन तत्प्रयुक्तकार्याणामनुशीलनम्<br>३.५ ससूत्रं निर्दिष्टसंज्ञाज्ञानं प्रयोगश्च<br>३.६ सर्वनामशब्दानां परिगणनपूर्वकं पूर्वादि-त्यदादिशब्दानाम्, उभोभयशब्दयोः, अन्येषाञ्च सर्वनामशब्दानां रूपावलिगतवैशिष्ट्यप्रकाशनम्<br>३.७ प्रातिपदिकविभक्त्योः संयोजनेन निर्दिष्टशब्दानां रूपनिष्पादनम्<br>३.८ अजन्तपुंलिङ्गशब्दानां रूपावलिबोधपूर्वकं वाक्येषु योजनम् |

| | |
|---|---|
| | ३.९ निर्दिष्टानां सूत्र-वार्तिक-परिभाषा-फक्किकानामर्थानुशीलनेन प्रयोगसाधनप्रक्रियाप्रदर्शनम् |
| ४. अजन्तस्त्रीलिङ्गशब्दानां ससूत्रं रूपसिद्धिप्रक्रियाबोधपूर्वकं प्रयोगः | ४.१ निर्धारितशब्दानां स्वरूपानुशीलनेन तत्सदृशानामजन्तस्त्रीलिङ्गशब्दानां निदर्शनम्<br>४.२ अजन्तस्त्रीलिङ्गशब्दानां प्रातिपदिकत्वसंसाधनं विभक्तियोजनेन रूपाणां निष्पादनञ्च<br>४.३ नदीसंज्ञायास्तत्प्रयुक्तकार्याणाञ्चावबोधः प्रयोगश्च<br>४.४ आबन्तेषु ङितां याट्स्याडागमयोरौङः शीभावस्य टौस्सम्बुद्धिष्वेत्वस्य ङेराम्भावस्य चानुशीलनम्<br>४.५ सर्वनामशब्देषु विशेष्यनिघ्नशब्देषु च समुचितस्त्रीप्रत्यययोजनेन स्त्रियां रूपाणां निष्पादनं प्रयोगश्च<br>४.६ अजन्तस्त्रीलिङ्गशब्दानां रूपावलिमनुशील्य वाक्येषु प्रयोगकौशलप्रदर्शनम्<br>४.७ निर्दिष्ट-सूत्र-वार्तिक-परिभाषा-फक्किकानामर्थापनं लक्ष्ये तत्समन्वयश्च<br>४.८ सूत्रार्थसङ्घटनपूर्वकं प्रयोगसिद्धिप्रकारान्वाख्यानम् |
| ५. अजन्तनपुंसकशब्दरूपावल्याः सूत्रार्थसङ्घटनपूर्विकायाः सिद्धिप्रक्रियायाः परिज्ञानं प्रयोगश्च | ५.१ निर्धारितानां तत्सदृशानाञ्चाजन्तनपुंसकशब्दानां निदर्शनम्<br>५.२ नपुंसके सर्वनामस्थानस्य पृथक्संज्ञत्वस्य (पृथगर्थस्य) तत्प्रयोजनस्य चान्वाख्यानम्<br>५.३ नपुंसके स्वमोरम्भावस्य लुको वा, औङः शीभावस्य, जश्शसोः शिभावस्य च सार्वत्रिकप्रवृत्तेरनुशीलनेन नपुंसकशब्दानां रूपावल्याः साधुत्वप्रक्रियायाश्च वैशिष्ट्यप्रकाशनम्<br>५.४ नपुंसकेऽजन्तप्रातिपदिकानां ह्रस्वविधाननियमानुशीलनम्<br>५.५ अजादौ विभक्तौ इगन्तस्य क्लीबस्य नुमागमस्य, आमि नुटा नुम्बाधनस्य च नियमावबोधपूर्वकं प्रयोगः<br>५.६ निर्धारितसूत्र-वार्तिक-परिभाषा-फक्किकानामर्थापनं विधाय लक्ष्ये तत्समन्वयप्रकारनिदर्शनम्<br>५.७ अवस्थानिदर्शन-सूत्रार्थसङ्घटनपूर्वकं निर्दिष्टप्रयोगाणां साधुत्वप्रदर्शनं सिद्धपदानां प्रयोगश्च |

**दशमकक्षायाः**

| **शिक्षणोपलब्धिः** | **शिक्षणोपलब्धिविस्तारः** |
|---|---|
| १. हलन्तशब्दस्वरूपपरिज्ञानेन हलन्तपुंलिङ्गशब्दानां ससूत्रं रूपसिद्धिप्रक्रियानिदर्शनं सिद्धपदप्रयोगश्च | १.१ हलन्तशब्दानां स्वरूपमधिगत्य तेषां लिङ्गनिर्धारणम्<br>१.२ भ-पद-सर्वनामस्थानसंज्ञाप्रयुक्तकार्याणां हल्ङ्यादिलोपस्य चानुशीलनेन हलन्तशब्दानां रूपावलिगतवैशिष्ट्यनिश्चयनम्<br>१.३ सङ्ख्यावाचकशब्दानां लिङ्ग-वचन-रूपावलिगतवैशिष्ट्यपरिचायनेन |

| | |
|---|---|
| | प्रयोगः<br>१.४ द्विपर्यन्तानामत्वपररूपेण किमश्च कादेशेन जायमानं त्यदादिशब्दस्वरूपपरिवर्तनमनुकृत्य विशेषनियमाभावेऽजन्तसर्वनामवत्तेषां रूपावलिनिर्धारणम्<br>१.५ सम्प्रसारणप्रक्रियाया अवबोधपूर्वकं प्रयोगः<br>१.६ युष्मदस्मच्छब्दयोः साधुत्वप्रक्रियायाः प्रयोगगतस्य च वैशिष्ट्यानुशीलनम्<br>१.७ नान्तशब्देषु सर्वनामस्थाने नुम्विकरणकशब्देषु च सम्बुद्धेः प्रथमैकवचने च जायमानयो रूपयोः सकारणं वैषम्याधिगमनेन प्रयोगः<br>१.८ प्रचलितानां हलन्तपुंलिङ्गशब्दानां रूपावलिबोधपुरःसरं प्रतिपदं वाक्येषु प्रयोगनिदर्शनम्<br>१.९ निर्धारितसूत्र-वार्तिक-परिभाषा-फक्किकानामर्थानुशीलनेन प्रयोगसिद्धिप्रक्रियाप्रदर्शनम्<br>१.१० हलन्तपुंलिङ्गशब्दतो निष्पन्नपदानां यथानिर्देशं प्रयोगेण अनुच्छेदरचना |
| २. हलन्तस्त्रीलिङ्गशब्दानां रूपावलिबोधपूर्वकं ससूत्रं साधुत्वप्रकारप्रदर्शनम् | २.१ हलन्तशब्दानां स्त्रियां पुंसि च रूपाणां साधनस्य चालनस्य च प्रक्रियायाः समत्वाभिज्ञानपूर्वकं प्रयोगः<br>२.२ अत्वपररूपेण कादेशेन वा प्राप्तादन्तत्वेभ्यस्त्यदादिशब्देभ्यष्टाब्विधानेन आबन्तसर्वनामवत्तेषां व्यवहरणम्<br>२.३ प्रचलितानां हलन्तस्त्रीलिङ्गशब्दानां रूपावलिबोधपूर्वकं वाक्येषु प्रयोगनिदर्शनम्<br>२.४ निर्धारितसूत्र-वार्तिक-परिभाषाणामर्थानुशीलनं लक्ष्ये तत्समन्वयप्रकारदर्शनञ्च<br>२.५ सूत्रार्थसङ्घटनपूर्वकं निर्दिष्टप्रयोगाणां साधुत्वप्रदर्शनम्<br>२.६ हलन्तस्त्रीलिङ्गप्रातिपदिकान्निष्पन्नपदानां गद्यांशे प्रयोगः |
| ३. सूत्रार्थसङ्घटनेन हलन्तनपुंसकलिङ्गशब्दानां रूपाणां साधनं प्रयोगश्च | ३.१ निर्धारितानामन्येषाञ्च प्रसिद्धानां हलन्तनपुंसकशब्दानां निदर्शनम्<br>३.२ हलन्तनपुंसके स्वमोर्लुकः, औङः शीभावस्य, जश्शसोः शिभावस्य च सर्वप्रातिपदिकव्यापकप्रवृत्तिमनुशील्य रूपाणां निष्पादनं प्रयोगश्च<br>३.३ हलन्तनपुंसकप्रातिपदिकानां रूपावल्याः साधुत्वप्रक्रियायाश्च वैशिष्ट्यप्रकाशनम्<br>३.४ लुमति तन्निमित्ताङ्गकार्याभावावबोधः तन्नियामकशास्त्रस्यानित्यत्वप्रतिपादनञ्च<br>३.५ आदेशविशेषेण अदन्ततां प्राप्तानां त्यदादिशब्दानां स्वम्भिन्नविभक्तिषु अदन्तसर्वनामवद्रूपावल्या निर्माणं प्रयोगश्च<br>३.६ प्रचलितानां हलन्तनपुंसकप्रातिपदिकानां रूपावलिबोधेन पदप्रयोगकौशलप्रदर्शनम्<br>२.७ निर्धारितसूत्र-वार्तिक-परिभाषा-फक्किकानामर्थापनं लक्ष्ये तत्समन्वयश्च |

| | |
|---|---|
| | २.८ निर्दिष्टप्रयोगाणां सूत्रार्थसङ्घटनेन साधनप्रकारप्रदर्शनम्<br>२.९ हलन्तस्त्रीलिङ्गप्रातिपदिकजानां रूपाणां प्रयोगेण वाक्यानुच्छेदरचना |
| ४. निर्धारितानामव्ययशब्दानामर्थानुशीलनपूर्वकं पदत्वसाधनं प्रयोगश्च | ४.१ अव्ययशब्दानां स्वरूपनिर्वचनपुरःसरमर्थप्रकाशनम्<br>४.२ अव्ययलक्षणं निदर्श्य सपरिगणनं स्वराद्यव्ययभेदप्रदर्शनम्<br>४.३ अव्ययसंज्ञकानां सूत्राणामर्थानुशीलनम्<br>४.४ अव्ययस्यालिङ्गत्वं प्रतिपाद्य ततो विहितस्य सुब्लुग्धिायके शास्त्रे आब्ग्रहणस्य व्यर्थत्वनिरूपणम्<br>४.५ अव्ययात्सुपो लुग्विधायकसूत्रस्यार्थमनुशील्य सर्वविभक्तिवचनेषु रूपाणां सादृश्यप्रतिपादनम्<br>४.६ निर्धारितानामव्ययशब्दानां ससूत्रं पदत्वसाधनम्<br>४.७ अव्ययपदानामर्थानुकूलप्रयोगेण वाक्यानुच्छेदविरचनम्<br>४.८ संस्कृतगद्यपद्ययोः प्रयुक्तानां निर्दिष्टानेकार्थकाव्ययपदानां सन्दर्भगतार्थान्वेषणमर्थान्तरे प्रयोगनिदर्शनञ्च<br>४.९ निर्दिष्टवार्तिक-फक्किकानां सोदाहरणमर्थापनं प्रयोगश्च |
| ५. ससूत्रं स्त्रीत्वप्रक्रियानुशीलनम् | ५.१ स्त्रीत्वप्रक्रियायाः सोदाहरणं परिचायनम्<br>५.२ सूत्रार्थसङ्घटनपूर्वकं टाप्-डाप्-चाप्-ङीप्-ङीष्-ङीन्-ऊङ्-तिप्रत्ययैः शब्दनिष्पादनम्<br>५.३ स्त्रीप्रत्ययान्तशब्दानां प्रातिपदिकत्वसाधनेन रूपावल्याः प्रदर्शनं प्रयोगश्च<br>५.४ निर्दिष्टसूत्र-वार्तिक-परिभाषा-फक्किकानामर्थापनं प्रयोगसिद्धिप्रकारप्रदर्शनञ्च<br>५.५ विशेष्यनिघ्नप्रातिपदिकानां स्त्रियां जायमानं प्रत्ययविशिष्टस्वरूपं निर्धार्य रूपाणां सञ्चालनं प्रयोगश्च |

४. विषयक्षेत्रं क्रमश्च

कक्षा ९

| क्र. सं. | प्रकरणानि | विषयक्षेत्रम् | बोधः | अभिव्यक्तिः | पाठ्य-घण्टाः |
|---|---|---|---|---|---|
| १. | पारिभाषिक्यः संज्ञाः परिभाषाश्च | • **मङ्गलाचरणम्**<br>मङ्गलस्य परिचयो भेदाश्च, मुनित्रयं नमस्कृत्येति मङ्गलाचरणपद्यव्याख्या<br><br>• **संस्कृतव्याकरणस्य परिचयः**<br>• **माहेश्वरसूत्राणि**<br>णकारानुबन्धस्य हकारस्य च वारद्वयं पाठस्य प्रयोजनानि,<br>प्रत्यहारसिद्धिप्रक्रिया, अन्योन्याश्रयदोषः, इतां प्रत्याहारेषु ग्रहणाभावे हेतुः<br><br>• **उपदेशपदार्थाः**<br>• **वर्णज्ञानम्**<br>वर्णोच्चारणशिक्षाग्रन्थस्य परिचयः, वर्णभेदाः, वर्णोत्पत्तिक्रमः, वर्णगतमात्रा, वर्णानां पारिभाषिकसंज्ञाः, स्वरितस्वरस्य श्रवणविषयकनियमः, वर्णोच्चारणस्थानप्रयत्नाः तत्प्रयोजनञ्च, आभ्यन्तरप्रयत्नस्य चतुर्विधत्वपञ्चविधत्वयोः हेतुः, ह्रस्वाकारस्य विवृतत्वसंवृतत्वव्यवस्था<br><br>• **अष्टाध्यायीग्रन्थपरिचयः**<br>संरचना, सूत्राणां षड्विधत्वम्, अष्टाध्यायीस्थसूत्राणां | मङ्गलस्य त्रिविधत्वम्,<br>मङ्गलाचरणप्रयोजनम्,<br>मुनित्रयमिति मङ्गलपद्यार्थः,<br>वणसमाम्नाये वर्णक्रमो हकारद्विरूपात्तप्रयोजनञ्च<br>प्रत्यहारनिर्मितिप्रकारः,<br>अन्योन्याश्रयदोषस्वरूपम्, प्रत्यहारसिद्धौ अन्योन्याश्रयदोषपरिहारप्रकारः,<br>चतुर्दशसूत्रेषु अनुबन्धानां प्रयोजनम्,<br>वर्णोत्पत्तेः प्रक्रिया क्रमश्च,<br>वर्णानां स्वर-व्यञ्जनभेदौ,<br>स्वराणामुदात्तादिभेदाः, व्यञ्जनानां स्पर्शादिभेदाः, अनुनासिकानुनासिकवर्णाः,<br>वर्णानां स्थानप्रयत्नानां सङ्ख्या नामानि प्रयोजनञ्च,<br>आभ्यन्तरप्रयत्नस्य चतुर्विधत्वे आपतिसमस्यानिराकरणोपायः,<br>पारिभाषिकपदानामर्थः,<br>अणः सवर्णिनां बोधकत्वम्, अणः तपरत्वे तात्कालिकसवर्णिनामेव बोधकत्वम्,<br>अष्टाध्यायीग्रन्थसंरचना, अष्टाध्यायीग्रन्थे | मङ्गलभेदकथनम्<br>मङ्गलप्रयोजनलेखनम् मुनित्रयमिति मङ्लपद्यस्य अन्वयस्य प्रतिपदं पर्यायस्य सरलार्थस्य च प्रकाशनम्<br>चतुर्दशसूत्रेषु वर्णक्रमनिर्वचनम्,<br>माहेश्वरसूत्राणामनुबन्धेन सहितं रहितञ्चोच्चारणम्<br>ससूत्रं प्रत्याहारसिद्धिप्रक्रियाया निगदनम्<br>अणादिचतुश्चत्वारिंशत्संज्ञानां तत्समागतवर्णानाञ्च कथनम्<br>प्रत्याहारसिद्धौ अन्योन्याश्रयदोषस्य हलन्त्यमिति सूत्रावृत्तेश्च सम्बन्धभाषणम्<br>वर्णोत्पत्तेः प्रक्रियाया क्रमस्य च कथनम्<br>वर्णानां भेदनिर्वचनम्<br>वर्णानां स्थानप्रयत्ननिर्धारणम्<br>पारिभाषिकसंज्ञानां ससूत्रं अर्थनिगदनम्<br>ससंरचनामष्टाध्यायीग्रन्थस्य | २० |

| | | | | | |
|---|---|---|---|---|---|
| | | सिद्धासिद्धत्वव्यवस्था<br><br>● अण उदितश्च स्वसवर्णिनां संज्ञात्वनिर्धारणम्<br>● अणस्तपरत्वे तात्कालिकसवर्णिनामेव बोधकत्वनिश्चयनम्<br>● गुणभेदेन वर्णानां भेदनिरूपणम्<br>● नाऽऽज्झलौ सूत्रावतरणफलम्<br>● एदैतोरोदौतोश्च सावर्ण्याभावे हेतुः विश्वपाभिः इत्यत्र ढत्वाऽऽभावनिरूपणम्,<br>● इत्-ह्रस्व-दीर्घ-प्लुत-उदात्त-अनुदात्त-स्वरित-अनुनासिक-वृद्धि-गुण-धातु-निपात-उपसर्ग-विभाषा-शब्दसंज्ञा-विशेषणसंज्ञा-अवसान-संहिता-पद-संयोग-लघु-गुरुसंज्ञा तद्विधायकसूत्राणि च<br>● **ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यमि**ति वार्तिकम्<br>● **खयां यमाः...** इत्यादि कारिकाद्वयम्<br>● संज्ञा-परिभाषासूत्रलक्षणम्<br>● टित्-कित्-मिदागमानां ङित्-शित्-एकाल्-अनेकालादेशानाञ्च व्यवस्था<br>सिद्धान्तकौमुद्याः संज्ञाप्रकरणतः परिभाषाप्रकरणान्ता विषयाः | सूत्राणां पाठक्रमस्य हेतुर्महत्त्वञ्च, सूत्राणां सपादीत्वत्रिपादीत्वं सिद्धत्वासिद्धत्वव्यवस्था च, सूत्रार्थनिर्धारणेऽनुवृत्त्यध्याहारव्यवस्था, ससूत्रं सिद्धान्तकौमुद्याः संज्ञाप्रकरणस्था इदादिपारिभाषिकसंज्ञा, स्थानवैषम्येऽपि ऋलृवर्णयोर्मिथः सावर्ण्यम्, अज्झलोरेदैतोरोदौतोश्च मिथः सावर्ण्याभावः, संज्ञापरिभाषासूत्रलक्षणम्, 'इकः' 'अचः' इति षठ्यन्तपदयोः उपस्थितिस्थलनिश्चयः, टित्-कित्-मितामागमानां, ङित्-शित्-एकाल्-अनेकालादेशानाञ्च व्यवस्था, अनिर्धारितसम्बन्धविशेषषष्ठ्याः स्थानपदार्थेन सह सम्बन्धः, आदेशनियामकानां सूत्राणां बाध्यबाधकभावः, परिभाषासूत्राणां विधिसूत्रोपकारकत्वम्, सूत्र-वार्तिक-परिभाषा-फक्किकार्थः | परिचायनम्<br>अष्टाध्यायीस्थसूत्राणां सिद्धासिद्धत्वव्यवस्थायाः सोदाहरणं निर्वचनम्<br>अणः उदितश्च स्वीयसवर्णिनां संज्ञात्वनिर्वचनम्<br>तपरत्वे तात्कालिकसवर्णिनामेव बोधकत्वप्रतिपादनम्<br>अज्झलोरेदैतोरोदौतोश्च सावर्ण्याभावे कारणनिदर्शनम्<br>सूत्राणां लक्षणकथनेन सोदाहरणं षड्भेदप्रकाशनम्<br>परिभाषासूत्राणां स्वरूपकथनम्<br>विधिसूत्राणामर्थापने परिभाषासूत्राणामावश्यकत्वप्रकाशनम्<br>आगमादेशयोर्भेदानां स्थापनप्रकाराणाञ्च निर्वचनम्<br>निर्दिष्टसूत्र-वार्तिक-परिभाषाणामर्थकथनम् | |
| २. | सन्धिः | ● **अच्सन्धिः**<br>सन्धिपरिचयः, सन्धिभेदाः, यण्-अयादि-गुण-वृद्धि-दीर्घ-पररूप-पूर्वरूपसन्धयः,<br>द्वित्व-जश्व-लोप-अवङ्, संयोगान्तलोप-रपरविधयः,<br>स्थानिवद्भावनिर्णयः, | सभेदं सन्धेरर्थः, सन्धौ संहिताया महत्त्वम्, वर्णयोर्व्यवहितत्वेनाव्यवहितत्वेन चोच्चारणस्य सन्धिना सह सम्बन्धः, सन्धेर्नित्यत्वस्य विवक्षाधीनत्वस्य चावस्थाः, एकादेश-सामान्यसन्ध्योः | सोदाहरणं सन्धिभेदकथनम्<br>विच्छिन्नावस्थासु प्रवर्तमानसन्धिनियमनिर्वचनम्<br>उदाहरणेषु सन्धिविधायकसूत्रकथनम्<br>स्थानिनः सदृशतमादेशान्वेषणम् | ३२ |

| | | | | | |
|---|---|---|---|---|---|
| | | टि-लोप-आम्रेडितसंज्ञाः,<br>सूत्र-वार्तिक-परिभाषा-फक्किकानामर्थापनम्,<br>प्रयोगसिद्धिप्रक्रिया, अच्सन्धियुतप्रयोगघटितानि वाक्यानि, शङ्कोपशङ्कासमाधानञ्च<br>● **प्रकृतिभावः**<br>प्रकृतिभावपदार्थः,<br>ह्रस्वसमुचितप्रकृतिभावसन्धिः,<br>प्लुत-प्रगह्यसंज्ञयोः प्रकृतिभावस्य च विधायकसूत्रवार्तिकाः,<br>वैकल्पिकानुनासिकविधिः,<br>सूत्र-वार्तिकार्थसमन्वयेन प्रयोगसिद्धिः, साधुप्रयोगघटिनवाक्यानि च<br>● **हल्सन्धिः**<br>श्चुत्व-ष्टुत्व-जश्त्व-चर्त्व-अनुनासिक-पूर्वसवर्ण-छत्व-अनुस्वार-परसवर्णसन्धयः,<br>सागमपरिचयं धुट्-तुक्-ङमुड्-कुक्-टुग्विधयः,<br>मस्य मयवलनविधयः, द्वितीयवर्णादेशविधिः, रुविधिः, रोरनुनासिकानुस्वारागमविधी, सत्वविधिः, जिह्वामूलीयोपध्मानीयविधी च<br>सूत्र-वार्तिक-परिभाषा-फक्किकार्थापनेन प्रयोगसिद्धिः, सिद्धप्रयोगनिर्मितानि वाक्यानि च<br>● **विसर्गसन्धिः**<br>विसर्गस्य विसर्ग-सत्व-षत्व-लोपसन्धयः,<br>सूत्रवार्तिकार्थसमन्वयेन प्रयोगसिद्धिः, सिद्धपदप्रयोगश्च | पार्थक्यम्, विधिसूत्रस्थानां षष्ठ्यन्त-सप्तम्यन्त-पञ्चम्यन्त-प्रथमान्तपदानामर्थगतवैशिष्ट्यं स्थान्यादेशागमैः सह सम्बन्धश्च, विधिसूत्रस्थपारिभाषिकसंज्ञार्थः, सूत्रार्थसम्पादनविधिः सूत्रार्थस्य लक्ष्ये समन्वयप्रकारश्च, लक्षणानुकूलोदाहरणान्वेषणम्, स्थान्यादेशयोः स्थान्यागमयोश्च सम्बन्धः, स्थानिनः स्थानार्थगुणप्रमाणैरादेशस्य सादृश्यपरीक्षा, स्थानिना सदृशतमस्यादेशस्य चयनम्, विच्छिन्नावस्थासु सूत्राणां प्रवृत्तित्वाप्रवृत्तित्वविवेकः, शास्त्राणां बाध्यबाधकाभावनिश्चयेन उदाहरणेषु समुचितविधेः प्रयोगः, पञ्चसन्धिप्रक्रिया, सूत्र-वार्तिक-परिभाषा-फक्किकार्थः, सूत्रार्थसङ्घटनेन प्रयोगसिद्धिप्रकारः, सन्धियुतस्य विच्छेदो विच्छिन्नस्य सन्धिविधानञ्च, प्रकृतिभावपदार्थः, प्लुत-प्रगृह्यसंज्ञा तत्प्रयुक्तकार्यञ्च, प्रकृतिभावप्रक्रिया, सन्धियुतपदानां वाक्येषु प्रयोगप्रकारः, वाक्यानुच्छेदेषु अनुस्वारस्य विसर्गस्य जिह्वामूलीयस्योपध्मानीयस्य च सन्धिनियमानुकूलः प्रयोगः | स्थान्यादेशयोः शत्रुवत्त्वस्य स्थान्यागमयोश्च मित्रवत्त्वस्य सोदाहरणं परिचायनम्<br>आदेशागमयोः स्थापनव्यावस्थायाः ससूत्रं प्रकाशनम्<br>सूत्रार्थसमन्वयाय समुचितोदाहरणान्वेषणम्<br>सन्धिगतपदानां सन्धिविच्छेदनम्<br>विच्छिन्नावस्थासु सन्धिविधानम्<br>सन्धेर्नाम तद्विधायकसूत्रञ्च भाषणम्<br>सूत्र-वार्तिक-परिभाषाणामर्थप्रकाशनम्<br>सूत्रार्थसमन्वयेन प्रयोगसिद्धिप्रकारलेखनम्<br>प्रकृतिभावस्य सोदाहरणं पारिभाषिकार्थनिगदनम्<br>विसर्गस्य सन्धिनियमानां सोदाहरणं सारिण्यां प्रदर्शनम्<br>अनुस्वारस्य तत्परसवर्णस्य चोदाहरणानां ससूत्रं सूचीनिर्माणम्<br>एकादेशसन्धीनां सोदाहरणं वैशिष्ट्यनिगदनम्<br>प्लुत-प्रगृह्यसंज्ञयोः प्रकृतिभावस्य च विधायकानां सूत्राणां सोदाहरणमर्थापनम्<br>अनेकशास्त्रप्रवृत्तेः स्थलेषु शास्त्राणां सिद्धत्वसिद्धत्वस्य पूर्वत्वापरत्वस्य | |

| | | | | | |
|---|---|---|---|---|---|
| | | ● **स्वादिसन्धिः**<br>रुत्व-उत्व-यत्व-यकारवकारलोप-विसर्गलोप-रेफादेश-रेफलोपनिमित्तकदीर्घ-सुलोपसन्धयः,<br>यवयोर्लघुच्चारणविधिः,<br>सार्थं प्रकरणस्थसूत्र-वार्तिक-फक्किकाः,<br>सूत्रार्थसङ्घटनेन प्रयोगसिद्धिः, सिद्धप्रयोगैर्वाक्यानि च<br>सिद्धान्तकौमुद्या अच्सन्धितः स्वादिसन्धिप्रकरणान्ता विषयाः | | अवकाशत्वानवकाशत्वस्य च विवेकेन समुचितशास्त्रस्य प्रयोगकौशलप्रदर्शनम्<br>सन्धियुक्तप्रयोगाणां वाक्येषु योजनम्<br>निर्देशानुसारेण सन्धेर्विधानं विच्छेदनञ्च | |
| ३. | अजन्तपुंलिङ्गम् | ● **सुबन्तपरिचयः**<br>पदपरिचयः, सुबन्ततिङन्तपदभेदौ सुबन्तपदपरिचयश्च, व्युत्पन्नाव्युत्पन्नशब्दपरिचयः, लिङ्गानां त्रिविधत्वञ्च<br>● **प्रतिपदिकसंज्ञा**<br>सूत्रयोरर्थः, **कृत्तद्धित...**इति सूत्रे समासग्रहणस्य नियमार्थत्वप्रतिपादनपूर्वकं समासग्रहणकृतनियमाकारः, व्युत्पन्नाव्युत्पन्नशब्दानां प्रातिपदिकत्वसाधनम्, अर्थवच्छब्दस्वरूपेषु धातु-प्रत्ययानां कृत्तद्धितभिन्नप्रत्ययान्तानाञ्च प्रातिपदिकत्वाभावनिरूपणम्, प्रातिपदिकसंज्ञाप्रयोजनञ्च<br>● **विभक्तिपरिचयः**<br>ससूत्रं सुप्प्रत्ययपरिचयः, सुपां परिगणम्, विभक्तिसंज्ञासूत्रम्, विभक्तेः सुप्तिङौ भेदौ, सुप्सु अनुबन्धानां प्रयोजनानि अनुबन्धविनिर्मुक्तस्वरूपाणि च, सुप्सु अजादि-हलादि-भादि-ङित्-औङ्-सुट्-आप्प्रभृतिविशेषसंज्ञाः तत्प्रयोजानि च, सुप्सु विभक्ति- | शब्द-पदयोः पार्थक्यम्, अपदस्याप्रयोगः, शब्दानां व्युत्पन्नाव्युत्पन्नत्वेऽजन्तत्वहलन्तत्वे च, लिङ्गानां त्रैविध्यम्, शब्दानां प्रातिपदिकसंज्ञा, धातूनां प्रत्ययानां कृदन्ततद्धितान्तभिन्नप्रत्ययान्तानां प्रातिपदिकत्वाभावः, सुप्प्रत्ययाः, सुपामनुबन्धास्तेषां प्रयोजनञ्च, सुप्सु अजादि-हलादि-भादि-ङित्-औङ्-सुट्-आप्प्रभृतिविशेषसंज्ञाः तत्प्रयोजानि च, सुप्सु विभक्ति-वचन-पुरुष-सम्बुद्धि-सर्वनामस्थानसंज्ञास्तत्प्रयुक्तकार्याणि च, प्रातिपदिक-विभक्तिसम्बन्धः, प्रातिपदिकात् सुबुत्पत्तिः, प्रातिपदिक-विभक्त्योर्योजनेन पदनिर्माणम्, शब्दानां रूपावलिः, पदानां प्रयोगेण वाक्यरचना, ससूत्रं पारिभाषिकसंज्ञास्तत्प्रयुक्तकार्याणि च, सूत्र-वार्तिक-परिभाषा- | प्रचलितशब्दानां व्युत्पन्नाव्युत्पन्नत्वनिर्धारणम्<br>शब्दपदयोः पार्थक्यकथनम्<br>अन्त्यवर्णाधारेण शब्दानामजन्तत्वहलन्तत्वनिश्चयनम्<br>अजन्तशब्दानामन्त्यवर्णाधारेण वर्गीकरणम्<br>सर्वनामशब्दानामर्थप्रकाशनेन सह परिगणनम्<br>पूर्वादिनवशब्दानां त्यदादिशब्दानाञ्च यथाक्रमं लेखनम्<br>ससूत्रं शब्दानां प्रातिपदिकत्वसाधनविधेर्निर्वचनम्<br>सभेदं लिङ्गं परिचाय्य प्रचलितशब्दानां लिङ्गनिदर्शनम्<br>सुप्प्रत्ययानामनुबन्धविनिर्मुक्त- | २० |

| | | | | | |
|---|---|---|---|---|---|
| | | वचन-पुरुष-सम्बुद्धि-सर्वनामस्थानसंज्ञाश्च<br><br>● **सुबुत्पत्तिः**<br>प्रातिपदिक-विभक्तिसम्बन्धः, सुबुत्पत्तेः प्रक्रिया, **ङ्याप्प्रातिपदिकादि**ति सूत्रे ङ्याब्ग्रहणस्य प्रयोजनम्, अङ्गसंज्ञा, विकरणविशिष्टस्यापि अङ्गसंज्ञासम्पादनम्,<br><br>● **सन्निपातपरिभाषा**<br>तात्पर्यः, प्रयोगः, अनित्यत्वप्रतिपादनञ्च<br><br>● **सर्वनामसंज्ञा**<br>सर्वादिगणपरिचयः<br>सर्वनामसंज्ञकसूत्रम्,<br>सर्वाद्यन्तस्यापि सर्वनामसंज्ञाविधानम्,<br>सर्वनामशब्दानां पूर्वादि-त्यदादिविभागपूर्वकं परिगणनम्, सर्वनामप्रयुक्तकार्याणि, उभशब्दस्य सर्वादिगणे पाठस्य प्रयोजनम्, उभये इत्यत्र नित्यतया सर्वनामत्वसाधनम्, **व्यवस्था**पदार्थनिर्वचनम्, **न बहुव्रीहौ** इत्यनेन प्रक्रियावाक्ये एव सर्वनामसंज्ञाया निषेधप्रतिपादनेन सह सूत्रस्य प्रत्याख्यानप्रकारश्च<br><br>● **पद्दन्नोमास्...** इति सूत्रे प्रभृतिग्रहणस्य प्रकारार्थत्वनिरूपणम्, **यत्क्रियायुक्ताः प्रादयः तं प्रत्येव गत्युपसर्गसंज्ञाः** इतिपङ्क्तेराशयः, **अप्तृन्नि**तिसूत्रे नप्त्रादिग्रहणस्य व्युत्पत्तिपक्षे नियमार्थत्वप्रतिपादनञ्च<br>● भ-पद-घि-अपृक्त-उपधा-नदी-षट्-संख्या-लुक्-श्लु- | फक्किकानामर्थापनं लक्ष्ये तत्समन्वयप्रकारश्च, सूत्रार्थसङ्घनेन अजन्तपुंलिङ्गशब्दानां रूपसिद्धिप्रक्रिया, घिसंज्ञाभावेन सखि-पतिशब्दयोर्विशेषसिद्धिप्रक्रिया, सर्वनामशब्दानां रूपावलिगतस्य सिद्धिप्रक्रियायाश्च वैशिष्ट्यम्, उभ-उभय-कतिशब्दानां रूपावलिगतवैशिष्ट्यञ्च | स्वरूपाणां प्रदर्शनम्<br>सुपामजादित्वादिविशेषधर्माणां निगदनम्<br>विभक्तिसंज्ञकसूत्रस्यार्थप्रकाशनम्<br>अजन्तपुंलिङ्गप्रातिपदिकेषु विभक्तियोजनेन रूपाणां निष्पादनम्<br>अजन्तपुंलिङ्गशब्दान्निष्पन्नपदेषु प्रातिपदिकविभक्त्योर्वचनस्य च निदर्शनम्<br>ससूत्रं निर्दिष्टसंज्ञानां तत्प्रयुक्तकार्याणाञ्च निगदनम्<br>निर्दिष्टसूत्र-वार्तिक-परिभाषा-फक्किकाणां सोदाहरणमर्थप्रकाशनम्<br>सूत्रार्थसङ्घटनेन निर्दिष्टशब्दानां रूपावल्याः साधुत्वप्रकारप्रदर्शनम्<br>साधुसुबन्तपुंलिङ्गपदानां प्रयोगेण वाक्यनिर्माणम्<br>अदन्तसर्वनामशब्दानां पुंलिङ्गे रूपावलिकथनेन वाक्ये प्रयोगनिदर्शनम्<br>अजन्तपुंलिङ्गानां प्रसिद्धव्यावहारिकशब्दानारूपावल्याः प्रयोगेण दैनिकव्यवहरणम् | |

| | | | | | |
|---|---|---|---|---|---|
| | | लुप्-गतिसंज्ञाः तत्प्रयुक्तकार्याणि च<br>● **रूपसिद्धिः प्रयोगश्च**<br>अजन्तपुंलिङ्गशब्दास्तत्र-<br><br>अदन्तेषु रामशब्दः, अजन्तसवनामशब्दाः, प्रथमादिशब्दाः, निर्जरशब्दः, पद्दन्नोमास्हृन्निशस.. इत्यादिसूत्रस्थादन्तपुंलिङ्गशब्दाः,<br>आकारान्तेषु<br>विश्वपा-हाहाशब्दौ,<br>इकारान्तेषु<br>हरि-सखि-पति-भूपति-कति-त्रि-द्वि-औडुलोमिशब्दाः,<br>ईकारान्तेषु<br>वातप्रमी-पपी-प्रधी-बहुश्रेयसी-अतिलक्ष्मीशब्दाः, कुमारीमिच्छन् कुमारीवाचरन् वा विग्रहे ब्राह्मणार्थकः कुमारीशब्दः, सुधी-सुखी-सुतीशब्दाश्च,<br>उकारान्तेषु<br>शम्भु-क्रोष्टुशब्दौ,<br>ऊकारान्तेषु<br>हूहू-अतिचमू-खलपू-वर्षाभूशब्दाः,<br>ऋकारान्तेषु<br>धातृ-पितृ-नृशब्दाः,<br>ॠकारान्तेषु<br>कम्लृ-गम्लृशब्दौ,<br>एकारान्तेषु सेशब्दः,<br>ओकारान्तेषु<br>स्मृतो-गो-सुद्योशब्दाः, | | | |

| | | | | | |
|---|---|---|---|---|---|
| | | ऐकारान्तेषु रैशब्दः,<br>औकारान्तेषु-ग्लौशब्दः, एतेषां शब्दानां सर्वविभक्तिवचनेषु रूपाणां ससूत्रं सिद्धिप्रक्रिया, उपयुक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावलिनिर्माणपूर्वकं पदप्रयोगश्च<br>● सूत्र-वार्तिक-परिभाषा-फक्किकानां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च<br>सिद्धान्तकौमुद्या अजन्तपुंलिङ्गप्रकरणस्था विषयाः | | | |
| ४. | अजन्तस्त्री-लिङ्गम् | ● **स्त्रीलिङ्गशब्दपरिचयः**<br>आबन्त-ङ्यन्त-ऊङन्त-क्तिन्नन्तशब्दपरिचयः, सर्वनामशब्दानां स्त्रियां टाबन्तरूपाणि, विशेष्यनिघ्नशब्दानां स्त्रीप्रत्ययविशिष्टस्वरूपाणि, लिङ्गविशिष्टपरिभाषया स्त्रीप्रत्ययान्तशब्दानां प्रातिपदिकत्वसाधनम्, अजन्तेषु प्रचलितनियतस्त्रीलिङ्गशब्दाश्च<br>● **प्रकरणगतविशेषकार्यपरिचयः**<br>आबन्तेषु - सोर्हल्ङ्यादिलोपः, औङः शीभावः, सम्बुद्धि-टौस्सु एत्वम्, ङिति असर्वनामसु याडागमः सर्वनामसु स्याडागमो ह्रस्वश्च, ङेराम्भावश्च<br>नित्यनदीसंज्ञकेषु ईदूदन्तेषु- सोर्हल्ङ्यादिलोपः, सम्बुद्धौ ह्रस्वः, ङिति आडागमो वृद्धिश्च, ङेराम्भावश्च<br>इदुदन्तनित्यस्त्रीलिङ्गेषु - विकल्पेन नदीसंज्ञा, ङिति नदीसंज्ञाया घिसंज्ञायाश्च प्रयुक्तकार्याणां वैकल्पिकं | स्त्रीप्रत्ययान्तशब्दानां प्रातिपदिकत्वसाधनविधिः, अजन्तस्त्रीलिङ्गशब्दस्वरूपम्, स्त्रियां जायमानानां विशिष्टकार्याणि,<br>अजन्तस्त्रीलिङ्गशब्दानां रूपावल्यारवबोधः, प्रतिपदं वाक्येषु प्रयोगश्च,<br>अजन्तस्त्रीलिङ्गशब्दानां ससूत्रं प्रयोगसिद्धिप्रक्रियायारवबोध,<br>सिद्धिप्रक्रियायाः क्रमे प्रयुक्तानां सूत्रवार्तिकफक्किकापरिभाषाणां सोदाहरणमर्थापनावबोधश्च | अजन्तस्त्रीलिङ्गशब्दानां रूपावल्याः, तेषां ससूत्रं सिद्धिप्रक्रियायाः निर्वचनं लेखनञ्च,<br>अत्र प्रसङ्गे आगतानां सूत्राणां वार्तिकफक्किकापरिभाषाणाञ्च सोदाहरणमर्थनिर्वचनं लेखनञ्च<br>वाक्येषु अजन्तस्त्रीलिङ्गशब्दानां प्रयोगोऽभ्यासश्च | २० |

| | | | | | |
|---|---|---|---|---|---|
| | | प्रवर्तनम्<br><br>● **रूपसिद्धिः प्रयोगश्च**<br>अजन्तस्त्रीलिङ्गशब्दास्तत्र-<br>आकारान्तेषु रमा-सर्वाद्याबन्तसर्वनाम-उत्तरपूर्वा-द्वितीया-तृतीया-अम्बादि-जरा-नासिका-निशाशब्दाः,<br>इकारान्तेषु मति-त्रि-प्रियत्रि-द्विशब्दाः,<br>ईकारान्तेषु गौरी-सखी-लक्ष्मी-स्त्री-अतिस्त्री-श्री-प्रधी-ग्रामणीशब्दाः,<br>उकारान्तेषु धेनु-क्रोष्टुशब्दौ<br>ऊकारान्तेषु वधू-खलपू-पुनर्भू-वर्षाभूशब्दाः,<br>ऋकारान्तेषु-<br>स्वस्रादि-मातृशब्दाः,<br>ओकारान्तेषु-<br>द्योशब्दः<br>ऐकारान्तेषु-<br>रैशब्दः<br>औकारान्तेषु-<br>नौशब्दश्च<br>एतेषां शब्दानां सर्वविभक्तिवचनेषु रूपाणां ससूत्रं सिद्धिप्रक्रिया, उपयुक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावलिनिर्माणपूर्वकं पदप्रयोगश्च<br>● सूत्र-वार्तिक-परिभाषा-फक्किकानां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च<br>सिद्धान्तकौमुद्या अजन्तस्त्रीलिङ्गप्रकरणस्था विषयाः | | | |

| | | | | | |
|---|---|---|---|---|---|
| ९. | अजन्तनपुंसक-लिङ्ग-शब्दाध्ययनम् | ● **नपुंसके रूपावलिगतवैशिष्ट्यपरिचयः**<br>प्रथमाद्वितीययोविभक्त्योः समरूपत्वम्, तृतीयादिषु पुंवच्च<br>● **प्रकरणगतविशेषकार्यपरिचयः**<br>अदन्तेषु स्वमोरम्भावः, अदन्तभिन्नेषु स्वमोर्लुक्, लुमति अङ्गकार्याभावस्तस्यानित्यत्वञ्च, सर्वप्रातिपदिकेषु औङः शीभावः, सर्वप्रातिपदिकेषु जश्शसोः शिभावस्तस्य सर्वनामस्थानसंज्ञा तत्प्रयुक्तकार्याणि च, औङः श्यां यस्येति चेति भप्रयुक्तस्य लोपस्याभावः, दीर्घान्तप्रातिपदिकानां ह्रस्वः, इगन्तेषु अजादौ विभक्तौ नुमागमः, अस्थ्यादीनां टादावचि अनङादेशश्च<br>● **रूपसिद्धिः प्रयोगश्च**<br>अजन्तनपुंसकशब्दाः- तत्र -<br>अकारान्तेषु ज्ञान-कतर-एकतर-अजर-हृदय-उदक-आस्य-मांसशब्दाः,<br>आकारान्तेषु श्रीपाशब्दः,<br>इकारान्तेषु वारि-अनादि-अस्थ्यादिशब्दाः,<br>ईकारान्तेषु सुधी-प्रधीशब्दौ<br>उकारान्तेषु मधु-सानु-प्रियक्रोष्टुशब्दाः,<br>ऊकारान्तेषु सुलूशब्दः,<br>ऋकारान्तेषु धातृज्ञातृकर्तृशब्दाः,<br>ओकारान्तेषु प्रद्योशब्दः,<br>ऐकारान्तेषु प्ररैशब्दः, | अजन्तनपुंसकशब्दानां रूपावल्यारवबोधः, प्रतिपदं वाक्येषु प्रयोगश्च,<br>अजन्तनपुंसकशब्दानां ससूत्रं प्रयोगसिद्धिप्रक्रियायारवबोध,<br>सिद्धिप्रक्रियायाः क्रमे प्रयुक्तानां सूत्रवार्तिकफक्किकापरिभाषाणां सोदाहरणमर्थापनावबोधश्च | अजन्तनपुंसकशब्दानां रूपावल्याः, तेषां ससूत्रं सिद्धिप्रक्रियायाश्च निर्वचनं लेखनञ्च,<br>अत्र प्रसङ्गे आगतानां सूत्राणां वार्तिकफक्किकापरिभाषाणाञ्च सोदाहरणमर्थनिर्वचनं लेखनञ्च<br>वाक्येषु अजन्तनुपुंसकशब्दानां प्रयोगोऽभ्यासश्च | ४ |

| | | | | | |
|---|---|---|---|---|---|
| | | औकारान्तेषु सुनौशब्दः<br>एतेषां शब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रिया, उपयुक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावलिनिर्माणपूर्वकं पदप्रयोगश्च<br>● सूत्र-वार्तिक-परिभाषा-फक्किकानां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च<br>सिद्धान्तकौमुद्या अजन्तनपुंसकलिङ्गप्रकरणस्था विषयाः | | | |
| **सैद्धान्तिकाभ्यासः** | | | | | **९६** |
| **प्रयोगाभ्यासः** | | | | | **३२** |
| **योगः** | | | | | **१२८** |

**दशमीकक्षा**

| **क्र. सं.** | **प्रकरणानि** | **विषयक्षेत्रम्** | **बोधः** | **अभिव्यक्तिः** | **पाठ्य-घण्टाः** |
|---|---|---|---|---|---|
| १ | हलन्तपुंलिङ्गम् | ● **हलन्तशब्दपरिचयः**<br>अव्युत्पन्नाव्यत्पन्नभेदौ, क्विप्-क्विन्-क्तिन्-क्तवतु-शतृप्रत्ययान्तशब्दपरिचयः, हलन्तास्त्यदादयः सङ्ख्यावाचकाश्च शब्दाश्च<br>● **प्रकरणगतविशेषकार्यपरिचयः**<br>सोर्हल्ङ्यादिलोपः, सुटः सर्वनामस्थानसंज्ञा तद्भिन्नासु अजादिषु हलादिषु च अङ्गस्य क्रमाद् भ-पदसंज्ञा तत्प्रयुक्तकार्याणि च, हकारान्तेषु पदान्ते झलि च हस्य ढत्वम्, दुहद्रुहादिषु घत्वं वैकल्पिकघत्वं भष्भावश्च, सम्प्रसारणसंज्ञा, वह्-श्व-युवन्-मघवन्-विद्वस्शब्देषु | हलन्तपुंलिङ्गशब्दानां रूपावल्यारवबोधः, प्रतिपदं वाक्येषु | वाक्येषु हलन्तपुंलिङ्गशब्दानां प्रयोगोऽभ्यासश्च,<br>हलन्तपुंलिङ्गशब्दानां ससूत्रं सिद्धिप्रक्रियायाः निर्वचनं लेखनञ्च,<br>अत्र प्रसङ्गे आगतानां सूत्राणां वार्तिकफक्किकापरिभाषाणाञ्च सोदाहरणमर्थनिर्वचनं लेखनञ्च | ३६ |

| | | | | | |
|---|---|---|---|---|---|
| | | भस्य सम्प्रसारणम्, सम्प्रसारेणे परे सम्प्रसारणाभावः, नकारान्तेषु सम्बुद्धिभिन्नसर्वनामस्थानेषु उपधादीर्घः, सम्बुद्धौ नलोपाभावः, भ्यामादिहलादौ पदान्तनलोपस्तस्यासिद्धत्वञ्च, अन्नन्तेषु भस्याकारलोपश्च, अदस्पर्यन्तानां त्यदादिशब्दानां अत्वपररूपेण किमः कादेशेन च अदन्तत्वममनन्त्ययोस्तदोः सौ सत्वं अदस उत्वमत्वविशेषश्च, युष्मदस्मदोः सर्वप्रातिपदिकभिन्नप्रक्रिया, उगिदन्तानां सर्वनामस्थाने नुमागमः, कृत्संज्ञा, क्विन्सम्बद्धकुत्वम्, झलि पदान्ते च चोः व्रश्चादेः षत्वञ्च, पदान्ते रेफवान्तयोर्धात्वोरुपधाया इको दीर्घश्च<br><br>● **रूपसिद्धिः प्रयोगश्च**<br><br>हलन्तपुंलिङ्गशब्दास्तत्र -<br><br>हकारान्तेषु लिह्-दुह्-द्रुहादि-विश्ववाह्-अनडुह्-तुरासाह्शब्दाः,<br><br>वकारान्तेषु सुदिव्शब्दः,<br><br>रेफान्तेषु चतुर्-प्रियचतुर्शब्दौ,<br><br>लकारान्तेषु कमल्शब्दः,<br><br>मकारान्तेषु प्रशाम्-किम्-इदम्शब्दाः,<br><br>णकारान्तेषु सुगण्शब्दः,<br><br>नकारान्तेषु राजन्-यज्वन्-वृत्रहन्-शाङ्गिन्-यशस्विन्-मघवन्-युवन्-श्वन्-अर्वन्-पथिन्-पञ्चन्-परमपञ्चन्-प्रियपञ्चन्-अष्टन्-प्रियाष्टन्शब्दाः,<br><br>धकारान्तेषु बुध्शब्दः,<br><br>जकारान्तेषु युज्-सुयुज्-खञ्ज्-राज्-परिव्राज्-विश्वराज्-भृज्ज्-ऋत्विज्-ऊर्ज्शब्दाः, | प्रयोगश्च,<br><br>हलन्तपुंलिङ्गशब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रियायारवबोधः,<br><br>सिद्धिप्रक्रियायाः क्रमे आगतानां सूत्रवार्तिकफक्किकापरिभाषाणां सोदाहरणम् अर्थापनावबोधश्च । | | |

| | | | | | |
|---|---|---|---|---|---|
| | | दकारान्तेषु त्यद्-तद्-अतित्यद्-यद्-एतद्-युष्मद्-अस्मद्-अतियुष्मद्-अत्यष्मद्-सुपाद्शब्दाः,<br>थकारान्तेषु अग्निमथ्शब्दः,<br>चकारान्तेषु प्राञ्च्-प्रत्यञ्च्-अदसञ्च्-उदञ्च्-सम्यञ्च्-पयोमुच्शब्दाः,<br>तकारान्तेषु महत्-धीमत्-गोमत्-भवत्-ददत्शब्दाः,<br>पकारान्तेषु गुप्शब्दः,<br>शकारान्तेषु तादृश्-विश्-नश्-घृतस्पृश्शब्दाः,<br>षकारान्तेषु दधृष्-रत्नमुष्-षष्-परमषष्-प्रियषष्-पिपठिष्-चिकीर्ष्-दोष्-विविक्ष्-गोरक्ष्शब्दाः,<br>सकारान्तेषु सुपिस्-विद्वस्-सेदिवस्-पुंस्-उशनस्-वेधस्-अदस्शब्दाः एतेषां शब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रिया, उपयुक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावलिनिर्माणपूर्वकं पदप्रयोगश्च<br>● सूत्र-वार्तिक-परिभाषा-फक्किकानां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च<br>सिद्धान्तकौमुद्या हलन्तपुंलिङ्गप्रकरणस्था विषयाः | | | |
| २. | हलन्तस्त्री-लिङ्गम् | ● **रूपसिद्धिः प्रयोगश्च**<br>हलन्तस्त्रीलिङ्गशब्दास्तत्र -<br>उपानह्-उत्ष्णिह्-दिव्-गिर्-चतुर्-किम्-इदम्-स्रज्-त्यद्-तद्-यद्-एतद्-वाच्-अप्-दिश्-त्विष्-सजुष्-आशिष्-अदस्शब्दाः<br>एतेषां शब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रिया, उपयुक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावलिनिर्माणपूर्वकं पदप्रयोगश्च<br>● सूत्र-वार्तिक-परिभाषा-फक्किकानां सोदाहरणमर्थापनं | हलन्तस्त्रीलिङ्गशब्दानां रूपावल्यारवबोधः, प्रतिपदं वाक्येषु प्रयोगश्च,<br>हलन्तस्त्रीलिङ्गशब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रियायारवबोधः,<br>सिद्धिप्रक्रियायाः क्रमे आगतानां सूत्रवार्तिकफक्किकापरिभाषाणां सोदाहरणम् अर्थापनावबोधश्च | वाक्येषु हलन्तस्त्रीलिङ्गशब्दानां प्रयोगोऽभ्यासश्च,<br>हलन्तस्त्रीलिङ्गशब्दानां ससूत्रं सिद्धिप्रक्रियायाः निर्वचनं लेखनञ्च,<br>अत्र प्रसङ्गे आगतानां सूत्राणां वार्तिकफक्किकापरिभाषाणाञ्च सोदाहरणमर्थनिर्वचनं लेखनञ्च | ९ |

| | | | | | |
|---|---|---|---|---|---|
| | | शङ्कोपशङ्कासमाधानञ्च<br>सिद्धान्तकौमुद्या हलन्तस्त्रीलिङ्गप्रकरणस्था विषयाः | | | |
| ३. | हलन्तनपुंसक-लिङ्गम् | ● **रूपसिद्धिः प्रयोगश्च**<br>हलन्तनपुंसकशब्दास्तत्र -<br>स्वनडुह्-विमलदिव्-वार्-किम्-इदम्-ब्रह्मन्-अहन्-दण्डिन्-स्रग्विन्-वाग्मिन्-बहुवृत्रहन्-असृज्-ऊर्ज्-त्यद्-तद्-यद्-एतद्-बेभिद्-गवाच्-यकृत्-शकृत्-ददत्-तुदत्-भात्-पचत्-दीव्यत्-स्वप्-धनुष्-पिपठिष्-पयस्-सुपुंस्-अदस्शब्दाः एतेषां शब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रिया, उपयुक्तानां तत्सदृशप्रचलितानाञ्च शब्दानां रूपावलिनिर्माणपूर्वकं पदप्रयोगश्च<br>● सूत्र-वार्तिक-परिभाषा-फक्किकानां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च<br>सिद्धान्तकौमुद्या हलन्तनपुंसकलिङ्गप्रकरणस्था विषयाः | हलन्तनपुंसकशब्दानां रूपावल्यारवबोधः, प्रतिपदं वाक्येषु प्रयोगश्च,<br>हलन्तनपुंसकशब्दानां रूपावल्याः ससूत्रं सिद्धिप्रक्रियायारवबोधः,<br>सिद्धिप्रक्रियायाः क्रमे आगतानां सूत्रवार्तिकफक्किकापरिभाषाणां सोदाहरणम् अर्थापनावबोधश्च । | वाक्येषु हलन्तनपुंसकशब्दानां प्रयोगोऽभ्यासश्च,<br>हलन्तनपुंसकशब्दानां ससूत्रं सिद्धिप्रक्रियायाः निर्वचनं लेखनञ्च,<br>अत्र प्रसङ्गे आगतानां सूत्राणां वार्तिकफक्किकापरिभाषाणाञ्च सोदाहरणमर्थनिर्वचनं लेखनञ्च | ९ |
| ४. | अव्ययप्रकरणम् | ● **सार्थमव्ययशब्दपरिचयः**<br>अव्ययलक्षणम्, स्वरादि-चादिशब्दास्तेषां सार्थं परिगणनञ्च, तद्धितप्रत्ययान्तेषु तसिलाद्यसर्वविभक्तिशब्दाः, कृदन्तेषु मान्ता एजन्ताः क्त्वा-तोसुन्-कसुन्प्रत्ययान्ताश्च शब्दाः, अव्ययीभावसमासनिष्पन्नशब्दाश्च<br>● **पदत्वसाधनं प्रयोगश्च**<br>अव्ययसंज्ञाविधायकानि सूत्राणि, अव्ययाद्विहितस्य सुपो लुग्विधिः, अव्ययानां ससूत्रं पदत्वसाधनम्, अदन्ताव्ययीभावसमासानां पञ्चमीभिन्नविभक्तिषु अम्भावेन तृतीयासप्तम्योश्च वैकल्पिकेनाम्भावेन पञ्चम्यां तृतीयासप्तम्योरमभावे च अदन्तपुंलिङ्गवद्रूपाणां निष्पादनम्, | अव्ययशब्दानामवबोधः,<br>सिद्धान्तकौमुद्याः अव्ययप्रकरणे आगतानां सूत्रवार्तिकफक्किकानां सोदाहरणमर्थावबोधः प्रयोगे समन्वयनप्रकारश्च । | अव्ययशब्दानामर्थनिर्वचनम्, प्रयोगे व्युत्पत्तिश्च<br>सिद्धान्तकौमुद्याः अव्ययप्रकरणे आगतानां सूत्रवार्तिकफक्किकानां सोदाहरणमर्थापनं, लेखनं प्रयोगश्च । | १८ |

| | | | | | |
|---|---|---|---|---|---|
| | | अव्ययपदघटितानि वाक्यानि<br>● अव्ययादाप्सुपः इत्यत्र आब्ग्रहणस्य व्यर्थत्वप्रतिपादनम्<br>● सदृशं त्रिषु... वष्टि भागुरिः... इति कारिके<br>● सूत्र-वार्तिक-परिभाषा-फक्किकानां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च<br>सिद्धान्तकौमुद्या अव्ययप्रकरणस्थविषयाः | | | |
| ५. | स्त्रीप्रत्यय-प्रकरणम् | **● स्त्रीप्रत्ययपरिचयः**<br>स्तनकेषाद्यतिरिक्तमेव लिङ्गम्, लौकिकस्य लिङ्गस्य शास्त्रेऽनुपयोगः, प्रातिपदिकस्य स्त्रीत्वं प्रातिपदिकस्यैव टाबादयप्रत्ययास्तु तद्योतका इति प्रतिपादनम्<br>**● स्त्रीत्वप्रक्रिया**<br>टाप्-डाप्-चाप्-ङीप्-ङीष्-ङीन्-तिप्रत्ययैः शब्दानां निष्पादनप्रक्रिया, स्त्रीप्रत्ययान्तशब्दानां प्रातिपदिकत्वसाधनं रूपावलिश्च<br>**● सभेदं जातिलक्षणम्**<br>**● स्वाङ्गस्य त्रिविधत्वम्**<br>● सूत्र-वार्तिक-परिभाषा-फक्किकानां सोदाहरणमर्थापनं शङ्कोपशङ्कासमाधानञ्च<br>सिद्धान्तकौमुद्याः स्त्रीप्रत्ययप्रकरणस्था विषयाः | स्त्रीप्रययनिष्पन्नानां शब्दानां प्रत्ययनिर्वचनपूर्वकं सूत्रार्थसमन्वयोपपत्तिः । | स्त्रीप्रत्ययान्तशब्दानां व्युत्पत्तिप्रदर्शनपूर्वकं सिद्धिप्रक्रियानिर्वचनं लेखनञ्च । | २४ |
| **सैद्धान्तिकाभ्यासः** | | | | | ९६ |
| **प्रयोगाभ्यासः** | | | | | ३२ |
| **योगः** | | | | | १२८ |

**५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च**

इमे क्रियाकलापाः सम्भाव्याः सन्ति । एतान् क्रियाकलापान् निदर्शनस्वरूपेण मत्वा अन्येऽपि क्रियाकलापाः सञ्चालयितुं शक्यन्ते ।

| **क्र.सं.** | **क्षेत्रम्** | **परीक्षणीयाः पक्षाः** | **अङ्कभारः** | **मूल्याङ्कनाधाराः** |
|---|---|---|---|---|
| १. | शिक्षण-सहभागिता | (क) उपस्थितिः<br>(ख) सहभागिता | ३ | ➢ विद्यार्थिनां दैनिकोपस्थितेरभिलेखः<br>➢ सामूहिकविमर्श-मौखिकपरीक्षा-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-भाषिकव्यवहारे सिद्धरूपाणां प्रयोगचातुर्यादिकार्येषु सहभागिता |
| २. | कक्षाकार्यं परियोजना-कार्यं वा | कक्षाकार्यं परियोजनाकार्यं वा | १० | ➢ विद्यार्थिषु पाठ्यवस्तुबोधः, सूत्राणां शुद्धोच्चारणम्, शुद्धलेखनम्, सूत्रवार्तिकार्थापनं, आवश्यकतानुसारेण गणसूत्र-वार्तिक-परिभाषा-न्याय-कारिकादीनामुपयोगः, रूपावलिप्रदर्शनं, सिद्धरूपाणां वाक्येषु समुचितप्रयोगः ।<br>➢ गृहकार्यं कक्षाकार्यं वा<br>➢ निर्धारितविषयवस्तुसम्बद्ध-परियोजनाकार्यस्य प्रतिवेदनमन्तर्वार्ता च |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | (क) सूत्रप्रयोगः | ७ | १. विषयस्य सारल्येनार्थापनम्<br>२. विस्तरेण व्याख्यानम्<br>३. सूत्राणां शुद्धोच्चारणम्<br>४. सूत्राणां पदच्छेदः, सूत्रस्थपदेषु विभक्तिवचननिर्देशः, सूत्रार्थबोधः, प्रयोगे समन्वयश्च<br>५. उदाहरणानां रूपाणां वा प्राथमिकावस्थाया निर्देशनम्<br>६. एकस्मिन् स्थले बहुषु विधिसूत्रेषु प्राप्तेषु बाध्यबाधकभावबोधनेनैकस्य प्रवृत्तिनिर्धारणम् |
| | | (ख) विषयवस्तुबोधः | ६ | १. माहेश्वरसूत्राणां प्रयोजनप्रदर्शनम्,<br>२. वर्णानां भेदनिरूपणम्,<br>३. वर्णानां स्थानप्रयत्नसंज्ञानां निदर्शनम्,<br>४. व्याकरणशास्त्रीयपारिभाषिकशब्दानां निर्दशम्,<br>५. षड्विधानां सूत्राणासोदाहरणं परिचायनम्,<br>६. वाक्ये प्रयुक्तानां पदानां सन्धिपरिचायनम्,<br>५. सुबन्ते प्रातिपदिकपरिचायनपूर्वकं विभक्तिवचनविभागः,<br>६. सुबन्तशब्दानां रूपावलिप्रदर्शनम्, |

| | | | | |
|---|---|---|---|---|
| | | | | ७. सूत्रार्थसमन्वयपूर्वकं सुबन्तशब्दानां रूपसिद्धिप्रक्रियाबोधनम्,<br>८. सिद्धरूपाणां वाक्येषु प्रयोगप्रदर्शनम्,<br>९. अव्ययशब्दानां स्वरूपावबोधनपूर्वकं वाक्येषु प्रयोगप्रदर्शनम्,<br>१०. स्त्रीप्रत्ययान्तशब्दानां प्रक्रियासिद्धिप्रदर्शनपुरस्सरं वाक्येषु प्रयोगदर्शनम्, |
| ४. | त्रैमासिक-परीक्षा | मौखिकं लिखितं वा | ६ | त्रैमासिकपरीक्षायाः प्राप्ताङ्कस्यानुपातिकप्रतिशताधारेणाङ्कनिर्धारणं कर्तव्यम् |
| योगः | | | ३२ | |

## ६. शिक्षणसञ्चालनप्रक्रिया

संस्कृतव्याकरणस्य मूल्यमान्यताऽऽदर्शानामध्ययनस्य माध्यमेन विद्यार्थिनां भाषाव्याकरणयोर्विविधपक्षाणां संस्कृतसम्बद्धविषयाणां वा ज्ञानेन सह सच्चरित्रवतां नैतिकतायुतानां च नागरिकाणां निर्माणमस्य विषयस्योद्देश्यं विद्यते । एतस्मिन् समाविष्टानां विषयवस्तुनामध्यापनक्रमे सर्वेभ्यः क्षेत्रेभ्यः समानं महत्त्वं प्रदातव्यं भवति । सम्बद्धविषयवस्तुनः सहजीकरणपूवर्कं ज्ञानशिल्पधारणानां विकासनमावश्यकम् । विद्यार्थिषु सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षञ्च विकासस्यानुकूलचिन्तनव्यवहारयोः समुन्नयनमेतस्य विषयस्य मुख्योद्देश्यं निर्धारितं वर्तते ।

व्याकरणशिक्षणविधौ प्रकरणगतशिल्पविकासाय अध्ययनसहजीकरणप्रक्रिया अपरिहार्या मन्यते । अस्मिन् क्रमे छात्रकेन्द्रितक्रियाकलापेषु महत्त्वं प्रदातव्यं भवति । प्रक्रियेयं पाठ्यक्रमस्य उद्देश्ये विषयवस्तुषु छात्राणां पृष्ठभूमौ चाधृता भवति । अध्ययनस्य सहजीकरणं सामूहिके वैयक्तिके चाभ्यासे आश्रितो भवति । अस्य पाठ्यक्रमस्य उद्देश्यस्य परिपूर्तये अधो निर्दिष्टेषु अध्ययनसहजीकरणक्रियाकलापेषु महत्त्वं दत्तमस्ति ।

माध्यमिकस्तरीयाणां छात्राणां स्तरानुकूल्येनाध्ययनाध्यपनक्रमे अधोऽङ्किताः शिक्षणसहजीकरणप्रक्रिया अवलम्बनीया भवन्ति-

१. **शुश्रूषा** - प्रथमं तावद् छात्राणां जिज्ञासोत्पादनाय विषयवस्तुषु यत्नः करणीयः । तत्र क्रमे भाषिकशुद्धये व्याकरणस्य महत्त्वबोधकः प्रसङ्ग उत्थापनीयः ।

२. **श्रवणम्** - जिज्ञासितेषु छात्रेषु विषयस्य प्रस्तुतीकरणं विधातव्यं भवति । अनेन प्रकारेण छात्राः पाठ्यविषयं सम्यग्रूपेण श्रोतुं प्रभवन्ति ।

३. **ग्रहणम्** - मनोयोगपूर्वकं श्रुतविषयवस्तुषु छात्रेषु तस्य ग्रहणं समीचीनतया भवितुमर्हति ।

४. **धारणम्** - अनेन प्रकारेण गृहीतस्य पाठ्यवस्तुनः तदनन्तरमाञ्जस्येन धारणं सम्भवति ।

५. **ऊहापोहः** - एवं प्रकारेण बुद्ध्यारूढस्य विषयवस्तुनः तर्कवितर्करूपेण वार्ताया माध्यमेन यथातथ्यस्य परीक्षणं भवति ।

६. **अर्थविज्ञानम्** - खण्डनमण्डनादिभिः तर्कवितर्केण च सह विषयवस्तुनः परीक्षणे जाते सति वस्तुतथ्यस्य यथार्थरूपेण स्थापनं भवति ।

७. **तत्त्वज्ञानम्** - अनेन क्रमेण प्रतिपाद्यतत्त्वस्य यथार्थबोधेन पाठ्यक्रमेण निर्धारितस्योद्देश्यस्योपलब्धिर्जायते ।

**अधो लिखितानुसारेण शिक्षणक्रमोऽवलम्बनीयः**

१. अष्टाध्यायीग्रन्थस्य संरचनायाः शिक्षणे

- ग्रन्थस्य प्रदर्शनम्, आन्तरिकसंरचनायाः (अध्यायपादविवरणस्य) पट्टिकादिषु लेखनं, वचनेन बोधनञ्च,

- सम्पूर्णग्रन्थे, प्रत्यध्यायं प्रतिपादञ्च सूत्रसंख्यायाः निर्वचनम्, सूत्राणां स्वरूपनिर्वचनम्, सूत्राणां षड्विधत्वप्रदर्शनम्, सिद्धासिद्धत्वव्यवस्थायाः प्रतिपादनम्,
- अध्यायेषु सूत्राणां पाठक्रमस्य हेत्वन्वेषणम् ।

२. वर्णशिक्षणे -

- रेखाङ्कनपद्धत्या चित्रपद्धत्या वा वर्णोत्पत्तौ यत्नस्य प्रारभणाद् आवैखरीध्वनि यावत् प्रदर्शनम्,
- चित्रमाध्यमेन व्याख्यानपद्धत्या च शरीरावयवानां भूमिकायाः प्रदर्शनम्, क्रियामादाय प्रयत्नानां स्थानानि आदाय स्थानानाञ्च निरूपणम्,
- कोष्ठे लिखित्वा गुणगतभेदान् आदाय वर्णानां भेददर्शनम्,

३. पारिभाषिकसंज्ञानां शिक्षणे
निर्धारितसर्वाः संज्ञाः पट्टिकायां लिखित्वा सूत्राणि प्रदर्शनीयानि, ततो व्यख्यानपद्धत्या सूत्रेषु स्थितैः पदैः सूत्रार्थो विधेयः, संज्ञासूत्राणां पूर्णविस्तारस्तु विधिसूत्राणां शिक्षणकाले एव करणीयः ।

४. सन्धीनां शिक्षणे

- कतिपयसन्धियुतप्रयोगाः पट्टिकायां लेखनीयाः, तदनन्तरं विच्छेदः, ततो सूत्राणि विनैव रूपसिद्धिक्रमः प्रदर्शनीयः, तत एव सूत्राणि अग्रे कृत्वा साधनप्रक्रिया शिक्षणीया ।

५. सुबन्तपदानां शिक्षणे

- शब्दानां रूपावल्याः शिक्षणम्, पूर्वशिक्षितरूपावलीतः भेदप्रदर्शनम्, रूपसिद्धिप्रक्रियायाः सूत्राणि विनैव प्रदर्शनं, ततः ससूत्रं साधनप्रक्रियाशिक्षणम् ।

६. अव्ययपदानां शिक्षणे

- इतरपदेभ्यः अव्ययपदानां स्वरूपभेदनिर्वचनमव्ययानामर्थकथनं लेखनञ्च, ततो केन सूत्रेणाव्ययत्वं तस्येतिदर्शनम्

७. स्त्रीप्रत्ययानां शिक्षणे

- प्रातिपदिकानां स्वरूपपरिचायनम्, सूत्राणि विनैव स्त्रीप्रययानां निर्वचनम्,

- स्त्रीत्वस्य प्रातिपदिकार्थत्व प्रतिपादनम्, प्रत्ययानां द्योतकत्वप्रतिपादनम्,

- स्त्रीत्वविशिष्टप्रातिपदिकानां स्त्रीप्रत्ययसहितरहितभेदेन द्विविधत्वप्रतिपादनम्, ततः सूत्राणि विनैव सिद्धिप्रक्रियायाः प्रदर्शनम्, ततः ससूत्रं सिद्धिप्रक्रियाया निरूपणम् ।

८. सूत्राणां व्याख्याने-

- सूत्राणां सम्यगुच्चारणम्, सूत्रस्थपदच्छेदस्तद्गतविभक्तिनिर्धारणञ्च,

- अनुवृत्तपदानि आनीय पदानां क्रमेण स्थापनम्, समुचितक्रियापदस्य सत्यावश्यकेऽन्यपदस्य चाध्याहरणम्,

- सूत्रवाक्यस्य सूत्रवृत्तिवाक्यस्य वा साहाय्येन अर्थापनम्,

- उदाहरणेषु सूत्रार्थसमन्वयनम्, ततः शङ्कोपशङ्का उत्थाप्य तत्समाधानम् ।

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धेः सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयो-रवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

अस्य स्तरस्य विद्यार्थिमूल्याङ्कनप्रक्रियाक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मकं निर्णयात्मकञ्चेति प्रक्रियाद्वयमवलम्ब्यते । अस्मिन् स्तरे व्याकरणाध्ययनं द्रढयितुं सामूहिकविमर्शन-लिखितपरीक्षा-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-भाषिकव्यवहारे सिद्धरूपाणां प्रयोगचातुर्यादिकार्यैर्निर्माणात्मकं मूल्याङ्कनं विधातुं शक्यते । तद्धि निरन्तरमूल्याङ्कनं भवति । स्तरोन्नतये कक्षोन्नतये च शैक्षिकसत्रस्यान्ते निर्णयात्मकमूल्याङ्कनमन्तिमपरीक्षाया माध्यमेन विधीयते । विद्यार्थिषु पाठ्यवस्तुबोधः, सूत्राणां शुद्धोच्चारणम्, शुद्धलेखनम्, सूत्रवार्तिकार्थापनं, आवश्यकतानुसारेण गणसूत्र-वार्तिक-परिभाषा-न्याय-कारिकादीनामुपयोगश्चेतिविषयाणां निदर्शनम्, रूपावलिप्रदर्शनं, सिद्धरूपाणां वाक्येषु समुचितप्रयोगश्चेति विषया मूल्याङ्कनस्याधारा मन्यन्ते । मूल्याङ्कनप्रणालिं विश्वसनीयां विधिसम्मताञ्च विधातुं संस्कृतव्याकरणविषयेऽपि आन्तराया बाह्यायाश्च मूल्याङ्कनपद्धतेरवलम्बनं विधीयते । वार्षिक्यां परीक्षायां प्रतिशतं पञ्चविंशतेरङ्कभारस्यान्तरं पञ्चसप्ततेरङ्कभारस्य बाह्यमूल्याङ्कनञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुनो मूल्याङ्कनं निरन्तरं विधेयम् । औपचारिकेण अनौपचारिकेण च रूपेण शिक्षणोपलब्धिः क्रमशः परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनं कर्तव्यं भवति ।

### (क) आन्तरं मूल्याङ्कनम्

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । व्याकरणस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन

अत्र क्रमे कक्षाध्यापकेन सूत्रोच्चारणाय सूत्रार्थापनाय च प्रेरणम्, सूत्रार्थावबोधनम्, उदाहरणेषु सूत्रप्रवर्तननिदर्शनम्, उदाहरणेषु प्रत्युदाहरणेषु च पार्थक्यबोधनाय प्रश्नोत्तराणि, सामूहिकी चर्चा, समूहविभाजनं कृत्वा समस्यायाः समाधानम्, नवीनोदाहरणचयनाभ्यासः, रूपावलिसञ्चालनाय कथनम्, रूपसिद्धिप्रक्रियालेखनाय प्रेरणम् कार्यम् ।

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

# विशिष्टीकरणतालिका

**कक्षा : १०** | **पूर्णाङ्का: ७५**

**समयः घण्टात्रयम्**

| क्र. स. | विषयक्षेत्रम् | प्रश्नस्वरूपम् | ज्ञानम् | | | बोधः | | | शिल्पम् | | | उच्चदक्षता | | | समाधेयाः प्रश्न-सङ्ख्याः | अङ्क-भारः | स्पष्टीकरणम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | क | ख | ग | क | ख | ग | क | ख | ग | क | ख | ग | | | |
| १. | हलन्तपुंलिङ्गप्रकरणम् | ज्ञान-बोध-प्रयोगोच्चदक्षतात्मकम् | १ | - | - | १ | - | - | - | १० | - | - | - | १६ | ६ | २८ | **ज्ञानबोध**क्षेत्रतः-<br>सूत्रवार्तिकपरिभाषाणां कार्यलेखनसम्बद्धो निर्दिष्टकार्यविधायकसूत्रलेखनसम्बद्धो वा एकः, प्रातिपदिकविभक्तिवचनलिङ्गनिदर्शन-सम्बद्धः शब्दरूपलेखनसम्बद्धो वा एकश्चेति कृत्वा द्वौ प्रश्नौ ।<br>**शिल्प**क्षेत्रतः-<br>सूत्रवार्तिकपरिभाषाणां सोदाहरणमर्थापनसम्बद्धः सूत्रार्थस्य लक्ष्ये समन्वयसम्बद्धः सूत्रव्याख्यासम्बद्धो वा एकः, शङ्कासमाधानसम्बद्ध एकश्चेति कृत्वा द्वौ प्रश्नौ ।<br>**उच्चदक्षता**क्षेत्रतः-<br>ससूत्रं प्रयोगसिद्धिप्रक्रियाप्रदर्शनसम्बद्धौ द्वौ प्रश्नौ । |
| २. | हलन्तस्त्रीलिङ्गप्रकरणम् | ज्ञान-बोध-प्रयोगात्मकम् | १ | - | - | १ | - | - | - | ५ | - | - | - | - | ३ | ७ | **ज्ञानबोध**क्षेत्रतः-<br>सूत्रकार्यलेखन-निर्दिष्टकार्यविधायकसूत्रलेखन-प्रातिपदिकविभक्तिवचनलिङ्गनिदर्शन- |

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | | शब्दरूपलेखनसम्बद्धौ द्वौ प्रश्नौ ।<br>**शिल्प**क्षेत्रतः-<br>ससूत्रं प्रयोगसिद्धिप्रकारलेखनसम्बद्ध एकः प्रश्नः । |
| **३** | हलन्तनपुंसकलिङ्ग प्रकरणम् | ज्ञान-बोध-प्रयोगात्मकम् | १ | - | - | १ | - | - | - | ५ | - | - | - | - | ३ | ७ | **ज्ञानबोध**क्षेत्रतः-<br>सूत्रकार्यलेखन-निर्दिष्टकार्यविधायकसूत्रलेखनसम्बद्ध एकः, प्रातिपदिकविभक्तिवचनलिङ्गनिदर्शन-शब्दरूपलेखनसम्बद्धः प्रातिपदिकविभक्त्योः संश्लिष्टरूपलेखनसम्बद्धो वा एकश्चेति कृत्वा द्वौ प्रश्नौ ।<br>**शिल्प**क्षेत्रतः-<br>ससूत्रं प्रयोगसिद्धिप्रकारलेखनसम्बद्ध एकः प्रश्नः । |
| **४** | अव्ययाध्ययनम् | ज्ञानबोधप्रयोगात्मकम् | २ | - | - | २ | - | - | - | १० | - | - | - | - | ६ | १४ | **ज्ञानबोध**क्षेत्रतः-<br>संज्ञासूत्र-सूत्रकार्यलेखनसम्बद्ध एकः, अव्ययपदस्यार्थलेखनसम्बद्ध एकः, अव्ययपदयोर्वाक्ये प्रयोगप्रदर्शनसम्बद्धौ द्वौ चेति कृत्वा चत्वारः प्रश्नाः ।<br>**शिल्प**क्षेत्रतः-<br>अव्ययपदानामर्थेन सह परस्परमेलनसम्बद्धः सलक्षणं सोदाहरणञ्चाव्ययपरियसम्बद्धः सूत्रकारिकाव्याख्यानसम्बद्धो वा एकः, ससूत्रं प्रयोगसिद्धिप्रकारलेखनसम्बद्ध एकश्चेति कृत्वा द्वौ प्रश्नौ । |
| **५** | स्त्रीप्रत्ययाध्ययनम् | बोध-प्रयोगोच्चदक्षतात्मकम् | - | - | - | १ | - | - | - | १० | - | - | - | ८ | ४ | १९ | **बोध**क्षेत्रतः-<br>प्रदत्तस्य अर्थस्य पुंलिङ्गशब्दस्य चाधारेण स्त्रीलिङ्गरूपलेखनसम्बद्ध एकः प्रश्नः ।<br>**शिल्प**क्षेत्रतः-<br>सूत्रवार्तिककारिकाणां सोदाहरणमर्थापनसम्बद्ध एकः, प्रयोगाणां ससूत्रं स्त्रीत्वप्रक्रियाप्रदर्शनसम्बद्ध |

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | | एकश्चेति कृत्वा द्वौ प्रश्नौ ।<br>**उच्चदक्षता**क्षेत्रतः-<br>ससूत्रं प्रयोगसाधुत्वप्रदर्शनसम्बद्ध एकः प्रश्नः । |
| योगः | | | ५ | - | - | ६ | - | - | - | ४० | - | - | - | २४ | २२ | ७५ | |

**द्रष्टव्यः**

**‘क’** इत्यनेन अतिलघुप्रश्नो बोध्यः ।

**‘ख’** इत्यनेन लघुप्रश्नो बोध्यः ।

**‘ग’** इत्यनेन सामान्यतया विस्तृतोत्तरापेक्षी (व्याख्यात्मकः) प्रश्नो बोध्यः।

**पुनश्च** - ज्ञानबोधक्षेत्राद् विकल्परहिताः प्रश्नाः प्रष्टव्याः । शिल्पक्षेत्राद् यथेच्छप्रकरणतः प्रश्नद्वयं संयोज्य आहत्य दश प्रश्नाः प्रष्टव्याश्चेद् उच्चदक्षताक्षेत्राद् यथेच्छप्रकरणत एकं प्रश्नं संयोज्य आहत्य चत्वारः प्रश्नाः प्रष्टव्याः । आहत्य तेषु दशसु छात्रैरष्टौ प्रश्नाः समाधेयाश्चेच्चतुर्षु त्रयः प्रश्नाः समाधेयाः ।

## विषयः - संस्कृतव्याकरणम्

कक्षा - १०　　　　　　　　　　　　　　　　　　　　पूर्णाङ्काः - ७५

प्रश्नानां वामपार्श्वे दत्ता अङ्काः पूर्णाङ्कान् द्योतयन्ति । यथासम्भवं मौलिकमुत्तरं देयम् ॥

### समूहः 'क'

**सर्वे प्रश्नाः समाधेयाः**　　　　　　　　　　　　　　　　**११×१=११**

१. 'मघोनः' इत्यत्र सम्प्रसारणविधायकं सूत्रं किम् ?
२. युष्मद्-शब्दस्य चतुर्थ्येकवचने किं रूपम् ?
३. 'वाक्षु' इत्यत्र प्रातिपदिकविभक्ती निर्दिशत ।
४. 'इयम्' इत्यत्र केन सूत्रेण दकारस्य यत्वम् ?
५. 'धनुष्+जस्' इत्यस्य संश्लिष्टं रूपं किम् ?
६. 'शप्श्यनोर्नित्यम्' इति सूत्रं किं करोति ?
७. मान्ता एजन्ताश्च कृदन्तशब्दाः केन सूत्रेणाव्ययसंज्ञकाः ?
८. 'सहसा' इत्यव्ययपदस्य कोऽर्थः ?
९. उच्चैः, पुनः, अनयोरेकस्य वाक्ये प्रयोगं कुरुत ।
१०. नूनम्, नक्तम्, अनयोरेकस्य वाक्ये प्रयोगं दर्शयत ।
११. 'आचार्यस्य स्त्री' इत्यर्थे किं रूपं निष्पद्यते ?

### समूहः 'ख'

**केषाञ्चन <u>अष्टा</u>नां प्रश्नानां सङ्क्षिप्तोत्तराणि लिखत**　　　　　　　　**८×५=४०**

१२. 'वाह ऊठ्' इति सूत्रस्यार्थापनं विधाय तस्य लक्ष्ये समन्वयप्रकारं दर्शयत ।
१३. 'साम आकम्' इत्यस्य स्थाने 'आम आकम्' इति विधाने को दोषः ?
१४. 'अलाक्षणिकमपि किञ्चित्कार्यं निपातनाल्लभ्यते' इत्यस्याशयं सोदाहरणं प्रकाशयत ।
१५. काः, अद्भिः, अनयोरेकस्य ससूत्रं सिद्धिप्रक्रियां दर्शयत ।
१६. इमानि, अहोभ्याम्, अनयोरेकं प्रयोगं ससूत्रं साधयत ।
१७. परस्परं मेलयत-

| | |
|---|---|
| युगपत् | मौने |
| सुष्ठु | अन्तिके |
| तुष्णीम् | व्यर्थे |
| वृथा | एककाले |
| निकषा | प्रशंसायाम् |

१८. उदेतोः, अधिहरि, स्वः, एषु द्वयोः ससूत्रं साधनं कुरुत ।
१९. 'टिड्ढाणञ्.....' इति सूत्रस्यार्थं सोदाहरणं प्रकाशयत ।
२०. अजा, श्वश्रूः, युवतिः, एषु द्वयोः ससूत्रं स्त्रीत्वप्रक्रियां दर्शयत ।
२१. 'आकृतिग्रहणा जातिः....' इति कारिकायाः सोदाहरणमर्थापनं कुरुत ।

### समूहः 'ग'

**केषाञ्चन <u>त्रयाणां</u> प्रश्नानामुत्तराणि लिखत**　　　　　　　　**३×८=२४**

२२. चत्वारः, राजा, पन्थाः, एषु द्वयोः सिद्धिपथं दर्शयत ।
२३. आवाम्, अमुना, अनयोरेकस्य प्रयोगस्य सूत्रार्थसङ्घटनपूर्वकं साधनं विधत्त ।
२४. धीमान्, विदुषः, अयम्, एषु द्वौ प्रयोगौ साध्यौ ।
२५. सर्विका, कुमारी, त्रिलोकी, भवानी, सीमा, कर्त्री, एषु चतुर्णां प्रयोगाणां प्रमुखसूत्रप्रदर्शनपूर्वकं साधुत्वं निरूपयत ।